# श्री मार्गबन्धुस्तोत्रं

शंभो महादेव देव
शिव शंभो महादेव देवेश शंभो
शंभो महादेव देव ॥

फालावनम्रत्किरीटं
फालनेत्रार्चिषा दग्ध पंचेषुकीटम् ।
शूलाहताराातिकूटं
शुद्धमर्धेंदुचूडं भजे मार्गबन्धुम् ॥ 1 । शंभो ... ।

अंगे विराजद्भुजंगं
अभ्रगंगातरंगाभिरामोत्तमांगम् ।
ओंकारवाटी कुरंगम्
सिद्ध संसेवितांघ्रिं भजे मार्गबन्धुम् ॥ 2 । शंभो ... ।

नित्यं चिदानंदरूपं
निह्नुताशेष लोकेश वैरिप्रतापं ।
कार्तस्वरागेंद्र चापं
कृत्तिवासं भजे दिव्यसन्मार्गबन्धुम् ॥ 3 । शंभो ... ।

© 2022 Vedam Nadam

कंदर्प दर्पघ्नमीशं
कालकंठं महेशं महाव्योमकेशं ।
कुंदाभदंतं सुरेशं
कोटिसूर्यप्रकाशं भजे मार्गबन्धुम् ॥ 4 । शंभो ... ।

मंदारभूतेरुदारं
मंदरागेन्द्रसारं महागौर्यदूरं ।
सिंदूरदूर प्रचारं
सिंदुराजातिधीरं भजे मार्गबन्धुम् ॥ 5 । शंभो ... ।

अप्पय्ययज्वेंद्र गीतं
स्तोत्रराजं पठेद्यस्तु भक्त्या प्रयाणे ।
तस्यार्थसिद्धिं विधत्ते
मार्गमध्येऽभयं चाशुतोषि महेशः ॥ 6

शंभो महादेव देव
शिव शंभो महादेव देवेश शंभो
शंभो महादेव देव ॥

॥ इति श्री अप्पय्यदीक्षित प्रणितं श्री मार्गबन्धुस्तोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam